# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्
## सत्रान्तपरीक्षा - अक्टूबर - 2019

| | | |
|---|---|---|
| **कक्षा - शास्त्री(SEM-5)(Old)** | **प्रश्नपत्रम् – 5** | गुणाः –70 |
| विषयः – नव्यव्याकरणम् | **कोड –C.C.3.5.9** | समयः- 3 तः 6 पर्यन्तम् |
| दिनाङ्कः –14/10/2019 | सन्दर्भग्रन्थः – परिभाषेन्दुशेखरः, वाक्यपदीयं च | |

**प्र. क्र.** **प्रथमान्वितिः (Unit 1)** गुणाः

**प्रश्न १ निम्नलिखितासु परिभाषासु द्वयोः व्याख्या कार्या।** १०

१ अनेकान्ता अनुबन्धा: ।

२ कार्यमनुभवन् हि कार्यी निमित्ततयानाश्रीयते ।

३ वार्णादाङ्गं बलीयो भवति।

**प्रश्न २ निम्नलिखितयोः एकस्याः परिभाषायाः सप्रसङ्गं व्याख्या कार्या।** १०

१ यत्रानेकविधमान्तर्यं तत्र स्थानत आन्तर्यं बलीयः।

२ गौणमुख्ययोर्मुख्ये कार्यं सप्रत्ययः।

**द्वितीयान्वितिः (Unit 2)**

**प्रश्न ३ निम्नलिखितासु द्वयोः परिभाषयोः व्याख्या कार्या।** १०

१ प्रत्ययग्रहणे यस्मात्सविहितस्तदादेस्तदन्तस्य ग्रहणम्।

२ अन्तरङ्गानपि विधीन् बहिरङ्गो लुग् बाधते।

३ अकृतव्यूहाः पाणिनीयाः।

**प्रश्न ४ निम्नलिखितयोः एकस्याः परिभाषायाः सप्रसङ्गं व्याख्या कार्या।** १०

१ कृद्ग्रहणे गतिकारकपूर्वस्यापि ग्रहणम् ।

२ असिद्धं बहिरङ्गमन्तरङ्गे।

**तृतीयान्वितिः (Unit 3)**

**प्रश्न ५ निम्नलिखितासु कारिकासु करिकाद्वयं सप्रसङ्गं व्याख्येयम्।** १०

१ स्मृतयो बहुरूपाश्च दृष्टादृष्टयोजनाः।
तमेयाश्रित्यलिङ्गेभ्यो वेदविद्भिः प्रकल्पिताः॥

२ अर्थप्रवृत्तितत्त्वानां शब्दा एव निबन्धनम्।
तत्त्वावबोधः शब्दानां नास्ति व्याकरणादृते॥

३ नित्याः शब्दार्थसम्बन्धास्तत्राम्नाता महर्षिभिः।
सूत्राणां सानुतन्त्राणि भाष्याणां च प्रणेतृभिः॥

**प्रश्न ६ कस्यापि एकस्य प्रश्नस्य उत्तरं देयम्।** १०

१ वाक्यपदीयानुसारं शब्दब्रह्मणः स्वरूपं प्रतिपादयत।

२ वेदस्य महत्त्वं स्वाधीतग्रन्थदिशा वर्णनीयम्।

**प्रश्न ७ निम्नलिखितेषु प्रश्नेषु केषाञ्चित् दशनां प्रश्नानाम् उत्तराणि लिखत।** १०

१ परिभाषेन्दुशेखरस्य कर्ता कः?

२ परिभाषेन्दुशेखरस्य प्रसिद्धायाः टीकायाः किं नाम?

३ परिभाषेन्दुशेखरस्य मङ्गलाचरणं किम्?

४ संज्ञापरिभाषाविषये कौ द्वौ पक्षौ स्तः?

५ किं नाम यथोद्देशम्?

६ कार्यकालशब्दस्य कोऽर्थः?

७ के अनुबन्धाः?

८ अनुबन्धाः अवयवा न भवन्तीति कया परिभाषया ज्ञायते?

९ कानि चतुर्विधानि आन्तर्यानि भवन्ति? ‘

१० चतुर्विधेषु आन्तर्येषु किम् आन्तर्यं बलीयः?

११ व्यपदेशिवदेकस्मिन् इति परिभाषायां को नाम व्यपदेशी?

१२ नित्यापेक्षया किं बलीयो भवति?

१३ वृत्तयः कतिधाः?

१४ जन्मादयः कति विकाराः सन्ति?

१५ शब्दार्थसम्बन्धाः कीदृशा: भवन्ति?